## परावरयोगे च। (२०/३३१९)

परावराभ्यां योगः परावरयोगः। परेण पूर्वस्य योगे गम्यमाने अवरेण [1]च परस्य धातोः क्त्वा प्रत्ययो भवति। परेण तावत् – अप्राप्य नदीं पर्वतः [2]स्थितः। परनदीयोगेन पर्वतो विशिष्यते। अवरयोगे – अतिक्रम्य तु पर्वतं नदी [3]स्थिता। अवरपर्वतयोगेन नदी [4]विशिष्यते॥

## समानकर्तृकयोः पूर्वकाले। (२१/३३२०)

समानः कर्ता ययोः धात्वर्थयोस्तत्र [5]पूर्वकाले धात्वर्थे वर्तमानाद् धातोः क्त्वा प्रत्ययो भवति। शक्ति-शक्तिमतोः भेदस्याविवक्षितत्वात् [6]समानकर्तृकता। भुक्त्वा व्रजति। पीत्वा व्रजति[7]। द्विवचनमतन्त्रम्[8]। स्नात्वा पीत्वा भुक्त्वा दत्त्वा व्रजति। समानकर्तृकयोः इति किम्? भुक्तवति ब्राह्मणे [9]गच्छति देवदत्तः। पूर्वकाले इति किम्? व्रजति च जल्पति [10]च।

[३३३] [11]आस्यं व्यादाय स्वपिति [12]चक्षुः संमील्य हसतीत्युपसंख्यानमपूर्वकालत्वात् (म. भा. २.१७३)॥

## आभीक्ष्ण्ये णमुल् च। (२२/३३४३)

समानकर्तृकयोः पूर्वकाले इत्येव। आभीक्ष्ण्यम् पौनःपुन्यम्[13]। प्रकृत्यर्थविशेषणं [14]चैतत्। आभीक्ष्ण्यविशिष्टेऽर्थे वर्तमानाद् धातोः णमुल् प्रत्ययो भवति, चकारात् क्त्वा च। द्विर्वचनसहितौ क्त्वाणमुलावाभीक्ष्ण्यं द्योतयतः, न केवलौ। 'आभीक्ष्ण्ये द्वे भवतः' (८.१.१२/२४४७ वा.) [15]इत्युपसङ्ख्यानाद् [16]द्विर्वचनम्। भोजं भोजं व्रजति, भुक्त्वा भुक्त्वा व्रजति। पायं पायं व्रजति, पीत्वा पीत्वा व्रजति॥

## न यद्यनाकाङ्क्षे। (२३/३३४४)

यच्छब्दे उपपदे धातोः क्त्वाणमुलौ प्रत्ययौ न भवतोऽनाकाङ्क्षे वाच्ये। यत्र [17]पूर्वोत्तरे क्रिये [18]स्तः, तच्चेद् वाक्यं [19]न परं किञ्चिदा[20]काङ्क्षते इति। णमुलनन्तरः, क्त्वा तु पूर्वसूत्रविहितोऽपि [21]प्रतिषिध्यते। यदयं भुङ्क्ते ततः [22]पचति। यदयमधीते ततः शेते। अनाकाङ्क्षे इति किम्? यदयं भुक्त्वा व्रजति अधीते एव ततः परम्॥

---

1. परस्य च योगे गम्यमाने ह. 2. स्थितः नास्ति ब. क. फ. 3. स्थिता नास्ति ब. 4. विशेष्यते अ. ग. फ. 5. पूर्वकालिके तु. फ, पूर्वकालिके धात्वर्थे ब. 6. समानः कर्ता अ. ब. क. फ, समानकर्ता ह. 7. देवदत्तः इत्यधिकम् ब. 8. बहुष्वपि भवति इत्यधिकम् अ. ब. फ. ह. 9. व्रजति ब. 10. च नास्ति फ. 11. आस्यं नास्ति फ. 12. अक्षिणी ब. फ, नेत्रे क. 13. भृशार्थो वा इत्यधिकम् फ. ह. 14. एतत् नास्ति अ. ब. फ. 15. इत्युपसङ्ख्यानम् फ. 16. द्विर्वचनम् नास्ति फ. 17. ते इत्यधिकम् अ. 18. भवतः तच्चेह फ. 19. नापरं ह. 20. आकाङ्क्षति फ. 21. विप्रतिषिध्यते ह. 22. पठति फ. ह.